# दशावतार रागमालिका

## तालम्ः रूपकम्

## श्री मुत्तुस्वामि दीक्षित विरचिता

### नाट रागः

माधवो मां पातु मत्स्यावतारो
वेदस्तेयदुष्टहरो वेदादिरक्षणः श्री

### गौळ रागः

गोविन्दं नमाम्यहं गुरुगुहनुतकूर्मावतारं
देवराजादिपूजितं दिव्यामृतप्रदम्

### श्री रागः

श्रीधरेण रक्षितोऽहं भूमिपालसूकरेण
हितदेवोपकारेण हयासुरहतिनिपुणेन

### आरभि रागः

नरसिंहाय नमस्ते प्रह्लादप्रार्थिताय
हिरण्यप्राणहराय हरिहयादिवन्दिताय

### वराळि रागः

वामनादन्यं न जानेऽहं नववररूपिणः
शुक्रबलिराजादिश्रुतिज्ञानप्रबोधिनो

### केदार रागः

परशुरामस्य दासोऽहं सीतापतिं शरणागतस्य
क्षत्रियकुलभीकरस्य जमदग्निऋषिपुत्रस्य

## वसन्त रागः

रामचन्द्रस्वामिनि भक्तिं करोमि
दशरथसुकुमारात्मनि दशवदनभञ्जनात्मनि

## सुरटि रागः

बलराम मां कलय भोगीशादिसोदर
मुरळीगानानन्द मुकुन्दादिसदालोल

## सौराष्ट्र रागः

श्रीकृष्णं भजरे चित्त श्रीरुक्मिणीपतिं
शिशुपालकंसादिहरं पाण्डवादिरक्षितवरम्

## मध्यमावति रागः

कलियुगवरवेङ्कटेशं खलसमूहहतसुरेशं
अलमेलुमङ्गेशं अच्युतादि भजेऽहमनिशम्

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠